# ज्योतिषशास्त्रे रोग विमर्श

**दीपक घिमिरे**

*उपप्राध्यापकः,वाल्मीकिविद्यापीठम्*

dghimire200@gmail.com

**सारसङ्क्षेपः**

*"**व्याधिना न पीडितः**" तदनुसारेण यस्य सम्पूर्णे जीवने कश्चिद्रोगो तं न पीडयति स एव स्वस्थो भवति। व्याधिना प्रपीडितश्चेत् स्वस्थस्य जीवनमपि अत्यन्तं दुःखदं भवति। रोगिणो जनाः निराशिणो भूत्वा म्रियन्ते। रोगसदृशः शत्रुर्नास्ति लोके । अतः "**न च व्याधिसमो रिपुः**"नीतिवचनमपि सुप्रसिद्धमेव। व्याधिपीडितस्य नरस्य औषधं परममित्रमस्ति। महाकविकालिदासस्य कुमारसंभवे महाकाव्ये साधनायाः प्रथमं सोपानं शरीररक्षणं वर्णितमस्ति। तथोक्तञ्च तत्रैव "**शरीरमाद्यं खलु धर्मसाधनम्**"। अत एव शरीरं स्वस्थं स्थापयितुं ऋषिभिः, महर्षिभिः, विपश्चिद्भिश्च युक्तय उपायाश्च स्वीकृताः सन्ति। एलोपैथी, होम्योपैथी, आयुर्वेदः,योगाभ्यासादिद्वारा च जना रोगमुक्ता भवितुमर्हन्ति। आयुर्वेदविज्ञानस्यानुसारं वात-पित्त-कफजनितदोषाणामसन्तुलनस्य कारणेन शरीरे रोगा अवश्यमेव जायन्ते।। कुण्डलीमवलोक्यैतद्वर्णयितुं शक्यते यत् केषां ग्रहाणां दशायां जनाः केन रोगेण पीडिता भवन्ति। तथा च रोगाणां समाधानमपि ज्योतिषशास्त्राधारेणैव कर्तुं शक्यत इति । नैकविधफलादेशानां कृते ज्योतिषे तनुधनसहजसुहृत्सुतरिपुजायामृत्युधर्मकर्मायव्ययभावाः परिकल्पिताः सन्ति द्वादश भावाः। कार्याणां सर्वप्रयोगप्रक्रियाः केवलं शरीरेण एव क्रियन्ते। शरीरं नानाकारणात् सुखि दुःखि वा भवितुमर्हति, परन्तु शरीरस्य दुःखस्य मुख्यकारणं रोग एव। षष्ठभाव एकमात्रं च वैरभावो भवति। आध्यात्मिकदृष्ट्या च कामादिषट्शत्रुभिः सह दुःखं प्राप्नोति। सामान्यतया शरीरस्य स्वस्थता त्रिधा सम्भवति। प्रथमं भोजनद्वारा शारीरिकरूपेण स्वस्थः भवितुं शक्यते, द्वितीयं मनोरञ्जनस्य माध्यमेन मानसिकरूपेण स्वस्थः भवितुं शक्यते, तृतीयमीश्वरस्य विषये चिन्तयित्वा आध्यात्मिकरूपेण स्वस्थो भवितुं शक्यते। असन्तुलितभोजनजीवनाभ्यासाः केवलं दोषाणामाश्रयं ददति। येषामाधारेण यदा शरीरे रोगाः समुत्पद्यन्ते तदा शरीरं दुःखं प्राप्नोति। यदा शरीरे वेदना भवति तदा जीवनमसन्तुलितं भवति ध्रुवम्। ज्योतिषशास्त्रात् रोगशत्रुसमस्यां ज्ञात्वा उभयपक्षयोर्निवारणाय आध्यात्मिकं शरणं प्राप्तुं प्रयत्नः करणीयः। ज्योतिषशास्त्रे अपि वर्णितं यत् कस्यचिद् योगस्यान्तर्गतं वैद्यःकस्यचित् व्यक्तिविशेषस्य मृत्युपर्यन्तं रोगस्य निदानं कर्तुं न शक्नोति। एवं प्रकारेण ये जनाः आयुर्वेदादि-एलोपैथी-होम्योपैथीद्वारा शतश उपायान् समुचितसमये समवलम्ब्य प्रयत्नं कृत्वा अपि निराशाः भवन्ति, ते आध्यात्मिकचिकित्साद्वारा सफलतां प्राप्नुवन्ति। अत एव समाधानं मन्त्रौषधविधिना अपि कर्तव्यम्।*

**शब्दकुञ्जिका-**

अदृष्टकारणम्, आनुवंशिकः, कुण्डली, कृभिः, चेचकः।

## उद्देश्यम्

अनुसन्धानात्मकलेखस्यास्य निम्नाङ्कितान्युद्देश्यानि सन्ति।

क. जन्मपत्रिकायां ग्रहभावादीनामाधारेण रोगाणां निरूपणम्।

ख.रोगकारिकावस्थाया निरुपणम्।

## समस्याकथनम्

प्रत्येकं रोगो दीर्घकालिकोऽल्पकालिको वेति पूर्वकर्मफलनिरुपितप्रतिकूलग्रहैर्भवतीति ज्योतिषशास्त्रस्य मतं वर्तते। तथैव तस्य विषये सूचना जन्मकालाद् प्रश्नकालाच्च प्राप्तुं शक्यते। कुण्डल्या आधारे जनः कियत्कालपर्यन्तं रोगेपीडितो भवति, तन्निवारणं कथं भवति, निवारणं भवित न वेति ज्ञानस्याभाव एव लेखस्यास्य समस्या इत्यन्तर्गतं भवति।

## सीमा

जन्मकुण्डल्यां विद्यमानानां भावानाम्, तस्यामवस्थितानां सूर्यादिनवग्रहाणां संयोगेन जातानां योगानामध्ययनं वर्तते।

## पूर्वकार्यसमीक्षा

अस्माकं पौरस्त्यपरम्परायां प्राचीनकालादेव वेदाङ्गानां विषये भृशमनुसन्धानमन्वेषणञ्च विहितं वर्तते। अनुसन्धानानुभपाश्रितञ्ज्योतिषविषये अनेकानि पुस्तकानि लिखितानि सन्ति। ज्योतिषशास्त्रसम्बद्धपुस्तकेषु पराशर- वराहमिहिर- कल्याणवर्मा- गणेशदैवज्ञ- जीवनाथ- दैवज्ञ- महादेवशर्मा- मन्त्रेश्वर- वैद्यनाथ- इत्यादिमहाभागैर्विविधा रोगाः समुल्लिखिताः सन्ति। रोगाणां विषये ज्योतिषशास्त्रसम्बद्धानि सीमितसङ्ख्याकानि पुस्तकानि सम्प्रति समुपलभ्यन्ते। ज्योतिर्विदः कृष्णकुमारस्य रोगविषयः, सेतुबन्धरामेश्वरमिश्रस्य ज्योतिर्विदः चिकित्सा, शुक्लदेवचतुर्वेदी ज्योतिर्विद रोगविषयश्चेत्येते अध्ययनस्यास्य प्रमुखविचाराः सन्ति। कासुचित् पत्रिकासु अन्तर्जालेषु च केचन लेखाः प्रकाशिता दृश्यन्ते।

## शोधविधिः

प्रस्तुतलेखस्य कृते सामग्रीसङ्कलनाय पुस्तकालयविधिः प्राधान्येन सम्प्रयुक्तो वर्तते। निगमनागमन व्याख्यानात्मकविधयो लेखेऽस्मिन् प्रयुक्ताः सन्ति।

## विषयप्रवेशः

मनुष्यः स्वपूर्वजन्मविहितशुभाशुभकर्मणां प्रभावाद् रोगी भवति तथैवान्यविषयाणामिव कुण्डल्या आधारे मनुष्ये उत्पत्स्यमानरोगाणां पूर्वमेव सङ्केतं प्राप्तुं शक्यत, इति ज्योतिषशास्त्रायुर्वेदशास्त्रयोरभिमतं वर्तते। आहारजीवनशैल्यादिभिश्च रोगाणां सम्बन्धो भवतीति केषाञ्चन जनानां विश्वासोऽयं वर्तते। रोगा अनियमितातायाः कारणेन समुत्पद्यन्ते। प्रतिदिनमाहारविहारान् विचार्य जीवनशैली परिवर्त्यते चेन्मनुष्यः दीर्घायुः, स्वस्थश्च भवितुमर्हति। किन्तु ज्योतिर्विदः प्रत्ययः एतद्विरुद्धः। अनियमिताहार एव केवलं व्याधिकारणं न मन्यते। लोकेऽपि दृश्यते यत्-


अनियमिताहारा मनुष्या अपि स्वस्थाःसन्तो जीवनं यापयन्तः सन्ति । नियमिताहारा मनुष्या अपि रोगिणः सञ्जाताः सन्ति । अत एव केवलमनियमित आहार एव व्याधिकारणं नभवति । यदि केवलमाहारस्यानियमितता एव रोगस्य कारणं मन्यते तर्हि आनुवंशिकरोगाणां, महामारीरोगाणां, दुर्घटनाजन्यरोगाणाञ्च कारणं कदापि न विज्ञायेत, आहाराद् बाह्यविषयभूतत्वाद् अतः केवलमाहारस्यानियमितता एव व्याधिकारणं न प्रत्युत पूर्वजन्मविहितकर्म, दोषः, क्रोधः, पित्तकफादिचेत्यादीन्यपि व्याधिकारणानि वर्तन्ते ।

रोगः लघुः, दीर्घश्चापि भवति । पूर्वजन्मविहितकर्मप्रतिकूलफलैर्जायते । तस्य सूचनां जन्मसमयाद्, प्रश्नकालाच्च सम्प्राप्तुं शक्यते । कुण्डलीमाश्रित्य वर्षेभ्यः पूर्वरोगं घोषयितुं समर्था जना भवन्ति । कस्मिन् समये, को रोगश्च समुद्भवति, कर्मफलञ्च कीदृशं भवतीति समुद्घोषितुं शक्यते ।

ज्योतिषग्रन्थेषु रोगाणां गाम्भीर्येण विचारात् पूर्वं रोगाणां भेदा विचारिताः सन्ति । अस्मिन् शास्त्रे रोगो द्विविधः स्मृतः(प्रश्नमार्गः, भागः१अ.१२.श्लो.१८) १) सहजः २) आगन्तुकः / सहजरोगाः स्वाभाविका रोगाः, आ जन्मनः समुत्पमानो रोगः सहजरोगः। जन्मानन्तरं जायमानो रोगः आगन्तुकरोगः। आगन्तुकरोगाः अर्जितरोगाः इत्यपि कथ्यन्ते । जन्मजातरोगा द्विविधाः सन्ति– १. शारीरिकरोगः २. मानसिकरोगश्च ।

पङ्गुता, कुब्जता, अन्धता, मूकता, बधिरता, नपुंसकता, इन्द्रियशैथिल्यम्, अङ्गवैकल्यम् इत्यादयः केचन शारीरिकरोगाः जन्मजातरोगाः कथ्यन्ते । जाड्यम्, औन्माद्यमित्यादयः केचन मानसिकरोगा अपि जन्मजातरोगाः सन्ति । एवंरीत्या एवंविधाः शारीरिकमानसिकोभयरोगा जन्मजातरोगाः इत्युच्यन्ते ।

आगन्तुकरोगोऽपि द्विविधः । दृष्टनिमित्तजन्यः, अदृष्टनिमित्तजन्यश्चेति । शाप-अभिचार-घात-संसर्ग-महामारी-दुर्घटना-इत्यादीभिः प्रत्यक्षघटनाभिः समुत्पतस्यमाना रोगाः दृष्टनिमित्तजन्यरोगाः कथ्यन्ते तथैव बाधकग्रहयोगैः समुत्पन्ना रोगा अदृष्टनिमित्तजन्यरोगाः इति उच्यन्ते । एतेषां रोगाणां कारणं पूर्वजन्मकर्म वर्तते इति स्वीकृतं वर्तते । उक्तानां दृष्टनिमित्तजन्यरोगाणामेवम् अदृष्टनिमित्तजन्यरोगाणामपि शारीरिकमानसिकोभाभ्यां द्वैविध्यं स्मृतं वर्तते ।
यस्मिन् गृहे स्थाने वायं ग्रहः स्थाप्यते, तत्र जातकस्य मातुः कोऽपि स्वाभाविकः(जन्मजातः) मानसिकरोगो भवति ।




## सहजः(जन्मजातः) रोगः

जन्मजातरोगा जातकस्य पूर्वजन्मकर्मणा मातापित्रोः कारणेन च भवन्ति । अतो ज्योतिषशास्त्रे जन्मजातरोगस्य विचारो गर्भाधानेन कुण्डल्या च सुस्पष्टतया क्रियते । अर्थाद् गर्भाधानेन सह जन्मजातरोगस्य सम्बन्धो वर्तत इति ।

कुण्डलीषु अष्टमस्थानाद्, अष्टमेशग्रहाद्, अष्टमस्थाने विद्यमानाद् ग्रहाद्, अष्टमस्थानं दर्शिनो ग्रहाद् एवमन्ययोगेभ्यो जन्मजातशारीरिक रोगाणां विचारो विधीयते। (प्रश्नमार्गः,भागः १अ.१२.श्लो.२१) येषु योगेषु अष्टमेशेन एवमष्टमस्थानेन सह सुस्पष्टः सम्बन्धो दृष्यते तद्योगजन्यशारीरिकरोगा असाध्या भवन्ति, इति मन्यते। तथैव येषु योगेषु अष्टमेशेन अष्टमस्थानेन वा सह कोऽपि सम्बन्धो न भवति ते शारीरिक रोगाः साध्या मताः सन्ति। एतादृशा रोगाश्चिकित्सया निवार्यन्ते। परन्तु जन्मजातरोगेषु हीनाङ्गयोगजन्याः पङ्गुत्वमन्धता, मूकता, बधिरता इत्यादयो रोगाः तथा न मन्तव्याः।

उक्तकुण्डलीषु अष्टमेशचतुर्थेशयोः संयोगदृष्ट्या अर्थात् योगानामाधारेण जन्मजातमानसिकरोगा विचारणीयाः(प्रश्नमार्गः, भागः१ अ.१२.श्लो.२२) येषु अष्टमेशचतुर्थेशयोः संयोगः प्रत्यक्षं दृश्यते ते मानसिकरोगा असाध्या भवन्ति तथैव मानसिकरोगसम्बद्धयोगेषु अष्टमेशचतुर्थेशयोर्यदि योगःसम्बन्धो वा न दृष्यते चेद् मानसिकरोगा जन्मजाताः सन्तोऽपि चिकित्सया साध्या भवन्ति।

## दृष्टनिमित्तजन्यरोगाः

ये रोगाः प्रत्यक्षरूपेण जिज्ञास्यन्ते ते रोगा दृष्टनिमित्तजन्यरोगाः इत्युच्यन्ते। भय-शाप-अभिचार-घात-संसर्ग-महामारी-दुर्घटना चेत्यादिप्रत्यक्षकारणेभ्यः समुत्पन्ना रोगाः दृष्टनिमित्तजन्यरोगा वर्तन्ते। अत एतेषां रोगाणां प्रत्यक्षत्वं सम्भवति। एवम्प्रकारेण हैजा-चेचक-विविधमहामारी-शारीरिकी वेदना-आघात-दुर्घटना चेत्यादिभ्यो जायमाना शारीरिकी पीडा तथैव भय-शाप-व्यभिचार इत्यादीनां प्रभाववशादुत्पन्नाः सर्वेऽपि मानसिकशरीरिकोभयविधरोगा अस्मिन् वर्गे समाविष्टा वर्तन्ते। दृष्टनिमित्तजन्यरोगाणां विचारो जन्मकुण्डल्यां स्थितेभ्यः षष्ठस्थान-षष्ठग्रह-षष्ठस्थानास्थितग्रहैस्तथैव षष्ठस्थानं दर्शिभिर्ग्रहैश्च विधातव्यः। (प्र.मा.भाग-१, अ.१२.श्लो.२३)।

कुण्डल्यां षष्ठं स्थानं रोगाणामेवं शत्रूणाञ्च प्रतिनिधित्वमावहति। यदा कश्चिज्जनो येन केनापि कारणेन कस्यचिद् विरुद्धो भवति ततश्च विरोधो वर्धते चेत् तथा शापाभिचारघाताश्च आश्रीयन्ते। अतो भय-शापाभिचारघातानां मूले अत्यन्तविरोधी जन एव हेतुर्वर्तते, यः प्रमुखारिः कथ्यते।

## अदृष्टनिमित्तजन्यरोगः

प्रत्यक्षरूपेण येषां रोगाणां हेतुर्न दृश्यते ते रोगा अदृष्टनिमित्तजन्यरोगाः इत्युच्यन्ते। ज्वर-अतिसार इत्याख्याः सर्वेऽपि रोगा अस्मिन् वर्णे आयान्ति। एवंविधरोगान् विचारयन्तो ज्योतिर्विद आचार्या बाधकग्रहाणां प्रभाव एवादृष्टनिमित्तजन्यरोगाणां प्रमुखोहेतुर्वर्तत इति कथितवन्तो वर्तन्ते। सूर्यादिनवग्रहा मनुष्यशरीरस्य अखिलाङ्गधातुवातपित्तकफादिदोषाणां तथैवान्तरिक संरचनाया एवं सञ्चालनप्रक्रियायाः प्रतिनिधित्वमावहन्ति। कुण्डल्यां यो ग्रहो बाधको भवति स ग्रहः शरीरस्थाङ्गधातुदोषादीनां मध्ये यस्य प्रतिनिधिर्वर्तते, तस्मिन् जनिष्यमाणस्य बाधकस्य विकारस्य वा सूचनां सूचयति तथैव एवंविधविकारैस्ते रोगाः समुत्पद्यन्ते। अत अदृष्टनिमित्तजन्यानां शारीरिकरोगाणां तथैव मानसिकरोगाणामुत्पत्तेर्मुख्यहेतुत्वेन बाधकग्रहा एवाभिमता वर्तन्ते।

ज्योतिषशास्त्रे रोगविचारार्थं त्रीणि प्रमुखानि तत्त्वानि सन्ति। ग्रहः, राशिः, गृहञ्च। अतो ज्योतिषशास्त्रदृष्ट्या रोगाणां विस्तृतरूपेण चर्चां विधातुं पूर्वं ग्रहराशिगृहादीनां विचार आवश्यकः। नवग्रहा भिन्नाः सन्तोऽपि एकस्मिन् भावे केचन ग्रहाः सहैव स्थातुं शक्नुवन्ति। भिन्नाःसन्तोऽपि चेत् ते ग्रहा जनान् प्रभावयिष्यन्ति। ग्रहाणामेतादृशः प्रभावो

भवति येन प्रभावेण ते रोगं जनयन्ति तथैव शरीरं पीडयन्ति च । शरीरं क्रियारूपं वर्तते चेद् ग्रहाः कारणरूपा वर्तन्ते । मत्कृतकर्म एव कर्ता वर्तते तथैव कृतकर्मणः फलदाता ईश्वरो वर्तते ।

**अङ्गानां प्रतिनिधिचिह्नम्**

ज्योतिषशास्त्रस्य जातकादिग्रन्थेषु कालरूपस्य पुरूषस्य कल्पना विहिता अस्ति तथा च तस्य शरीरस्य विविधभागेषु मेषादिद्वादश राशयः स्थापिताः सन्तीतिज्ञातुं शक्यते । (बृहज्जातकम् १/४)(सारावली ३/५) (जातकपारिजातम्१/८) । राशीनामाधारेण शरीरस्य अङ्गानि प्रभावितानि भवन्ति । यथा- मेषः शिरः, वृषभः शिरः, मिथुनः बाहुः, कर्कःहृदयः सिंह उदरम्, कन्या अस्थि, तुला कटिः, वृश्चिकः जननेन्द्रियम्, धनुः ऊरू, मकरोजानु, कुम्भः ऊरु, मीनश्च पादौ इत्येवंप्रकारेण राशयोऽङ्गानां प्रतिनिधित्वं कुर्वन्ति । अधोलिखितशरीराङ्गानां मेषादिद्वादशराशयः प्रतिनिधयो वर्तन्ते (ज्योतिषशास्त्रे चिकित्साशास्त्रम्, पृ.२५) ।

**मेषः**- मस्तिष्कम्, ललाटम्, शिरः केशाश्च ।

**वृषभः**- लोचनम्, कर्णौ, नासिका, ओष्ठः, दन्तः, मुखम्, जिह्वा ।

**मिथुनम्** - कण्ठः, बाहुः, स्कन्धः, मणिबन्धः, हस्तः, वक्षः, स्तनौ ।

**कर्कटः-** वक्षः, फुस्फुसाः, श्वासनली, हृदयञ्च ।

**सिंहः**- उदरम्, यकृत्, प्लीछा, वृक्कः, नाभिश्च ।

**कन्या-** कटिः, नितम्बश्च ।

**तुला**- वस्ति, मूत्रेन्द्रियम्, गर्भाशयोर्ध्वभागश्च ।

**वृश्चिकः-** राशिः, गर्भाशयो, जननेन्द्रियं गुदञ्च ।

**धनुः**- ऊरु

**मकरः**- जानु

**कुम्भः**- जङ्घा

**मीनः-** पादौ, पादतलम्,पादाङ्गुली ।

## मेषादिराशीनां प्रतिनिधयो रोगाः

मेषादिद्वादशराशीभिःस्वाभाविकतया समुत्पादिता रोगाः सन्ति यथा –

**मेषः-** नेत्ररोगः, मुखरोगः, उदररोगः, शिरोर्वदना, मानसिकीपीडा, हिस्टिरीया इत्याख्यरोगः, अनिद्रा ।

**वृषः**- कण्ठस्य श्वसनमार्गस्य च व्याधिः, नेत्रनाशसम्बद्धरोगः, कण्ठरोगश्च ।

**मिथुनः**- रक्तविकारः, श्वसनसमस्या, फुफ्फुसरोगः, मज्जारोगश्च ।

**कर्कटः**- हृदयरोगः, रक्तविकारश्च ।

**सिंहः**- उदरविकारः, उदरविस्तारश्च ।

**कन्या**- यकृत्-प्लीह-उदर-अजीर्ण-दुर्पक्वः-कटिविकाराः, वेदना ।

**तुला-** मूत्ररोगः, मधुमेहरोगः, ल्यूकोरिया इति रोगः, मूत्रमार्गस्य सङ्क्रमणं, बहुमूत्रञ्च ।

**वृश्चिकः-** लिङ्गरोगः, बवालीररोगः, उपदंशरोगः, कुष्ठरोगः, सङ्क्रामकरोगश्च ।

**धनुः-** यकृत्विकाराः, मासिकधर्मविकारः, अस्थिभङ्गरोगः, व्रणरोगः, रक्तविकारश्च ।

**मकरः-** गठिया इति रोगः, शीतरोगः, चर्मरोगः, रक्तचापश्च ।

**कुम्भः-** मन्दता, मानसिकरोगः, 'ऐठन'-इत्याख्यरोगः, उष्णता च।

**मीनः-** असहिष्णुता, त्वक्रोगः, रक्तविकारः, वातरोगः, ग्रन्थिसम्बद्धरोगः।

रोगस्य विचारसन्दर्भे ग्रहाणां कः परिचयः?, को ग्रहः कस्य प्रतिनिधिः? (फलदीपिका १४/२/९), तस्य ऊर्ध्वता, वर्णश्च कः?, शरीरस्य केषु केषु अङ्गेषु कः कः प्रभावो ग्रहाणाम् ?, (जातकपरिजातः अ.२.श्लो.७५-८१) रोगाणां कारणं को ग्रहः? इत्येतेषां विषयाणां विचारो ज्योतिषग्रन्थेषु पूर्वमेव विहितो वर्तते ( गदावली, अ.१.श्लो.६-१४)। अतस्तेषां ग्रनथानामाधारेण सूर्यादिनवग्रहाणां परिचय इत्थं दातुं शक्यते –

## सूर्यः

अग्नितत्त्वसम्बद्धः शुष्कग्रहो वर्तते। ग्रहोऽयं पुरुषाणां वामभागं स्त्रीणां दक्षिणभागं नेत्रे, वयः, अस्थि, शिरः, हृदयं, प्राणशक्तिः, भेदः, रक्तम्, पित्तञ्च प्रभावितं करोति। ग्रहस्यास्य प्रबलत्वाद् अस्थीनि सुदृढानि भवन्ति तथैव शरीरं स्वस्थं भवति। ग्रहे निर्बले सति अशुभकारके रोगकारके च सति क्षय-पित्त-प्रकोप-नेत्ररोग-अस्थिरोग-शिरोरोग-हृदयरोग-ज्वर इति विविधनामानो रोगा जायन्ते।

## चन्द्रमा

ग्रहोऽयं जलतत्त्वयुक्तो विशालकाययुक्तश्च वर्तते। ग्रहस्यास्य प्रभावः नेत्रे, स्तनौ, वृक्षः, मनः, मस्तिकम्, मूत्रेन्द्रियम्, रसधातुः, शारीरिकपुष्टिः, फफ्फुसम्, इत्यादिषु भवति। यदा ग्रहोऽयं प्रवलो भवति तदा शरीरे रक्तसञ्चारः सुष्ठुतया भवति, स्वास्थ्यं वर्धते, मनोबलञ्चोन्नतं भवति परन्तु यदि ग्रहोऽयं दुर्बलो रोगकारकः अशुभो भवति चेद् कफ-मूत्रविकार-जलोदर-मुखरोग-नासिकारोग-पाण्डु-क्षय-मन्दाग्नि-अतिसार-स्त्रीसंसर्गजन्यरोग-अपस्मार-वात-श्लेष्मा इति नामानो विविधरोगान् जनयति तथैव मानसिकरोगमपि जनयति।

## मङ्गलग्रहः

अग्नितत्त्वयुक्तः शुष्को ह्रस्वकाययुक्तश्च ग्रहोऽयं वर्तते। कपोल-कर्ण-स्नायु-जननेन्द्रिय-मज्जा-नितम्बबल-सहनशक्ति-पित्त इति स्थानेषु ग्रहोऽयं प्रभावं करोति। ग्रहस्यास्य प्रबलत्वाद् जनानां शरीरे विद्यमानानि अस्थीनि सुदृढानि भवन्ति। रोगैः सह योद्धुं शक्नोति। अशुभो रोगकारको वा भवति चेद् रक्तविकार-रक्तचाप-फोडा-कण्डू-शोफ-क्षति-रक्तस्राव-कुष्ठज्वर-वायुपित्तविकार-महाकारीजन्यरोग-दुर्घटना-जन्यरोग-गुप्तरोग-अग्निदाह-नासिकारोग-इत्यादिविविधरोगा जायन्ते तथैव शल्यक्रिया- प्रयोजकरोगा अपि जायन्ते।

## बुधः

पार्थिवतत्त्वयुक्तो जलीयग्रहोऽयं वर्तते। शरीरे ग्रहोऽयं जिह्वां वाणीं स्वरचक्रं श्वासप्रक्रियां पार्श्वमस्तिष्कम्, फुफ्फुसम्, मज्जां मुखञ्चेत्यादीनि अङ्गानि प्रभावयति। यदा बलवान् भवति तदा बालकस्य मस्तिष्कं पूर्णतया विकसति। बुधे ग्रहे बलवति सति जन आकर्षको भवति, तस्य प्रतिपादनशैली अपि आकर्षिका भवति। निर्बलत्वे रोगकारके सति च चैतन्यशून्यता, हिस्टीरिया- मानसिकरोगः, दुर्बलः, निमोनिया इति रोगः, ज्वरः, त्रिदोषज्वरः, पाण्डुसङ्ग्रहः, कोलिकः, उदरविकार, वाणीविकारः, शूललरोगः, मन्दाग्निः, गण्डविकारः, कण्ठरोगः, नासिकारोगश्चेत्यादयो रोगाः सम्भवन्ति।

## बृहस्पतिः

आकाशतत्त्व- यक्तो जलीय- ग्रहो बुहस्पतिर्वर्तते । शरीरे भेद-वीर्य-उदर- यकृत्- रक्तधमनी- त्रिदोष- कफ-चेत्यादीनि ग्रहोऽयं प्रभावयति । ग्रहोऽयं यदा बलवान् भवति तदा शरीरं स्वस्थं पुष्टं भवति, वैचारिकी शक्तिः सुदृढानिश्चला भवति तथैव वीर्यं पुष्टं भवति । परन्तु ग्रहोऽयं यदा निर्बलः अशुभो रोगकारकश्च भवति तदा उदरविकारः, मज्जादोषः, यकृत्रोगः, प्लीहा, स्थूलता, दन्तरोगःवायुविकारः, मूर्च्छनम्, मस्तिष्कविकारः, ज्वरः कर्णरोगः उच्चैः पतनम्, मानसिकीपीडा चेत्यादीनि भवन्ति ।

## शुक्रः

जलतत्त्वयुक्तो ग्रहोऽयं वर्तते तथैव मध्यमोन्नता जना ग्रहस्यास्य प्रभावेण समुद्भवन्ति । शरीरे ग्रहोऽयं जननेन्द्रिय-शुक्राणु-नेत्र-कपोल-चिबुक-स्वररस-गर्भाशय इत्यादीन् भागान् तथैव भावनात्मकशक्तिञ्च प्रभावयति । ग्रहेऽस्मिन् बलवति शरीरमाकारवद् भवति, मनुष्यस्य कामशक्तिर्बलवती भवति वीर्यञ्च बलवद् भवति । निर्बले रोगकारके अशुभकारके च सति मूत्रविकार-वीर्यविकार-गुप्तरोग-स्त्रीसंसर्गजन्यरोग- मादकद्रव्यसेवनजन्यरोग-विषयजन्यरोग-उपदंश-प्रमेह- मधुमेह- ल्यूकोरिया, कफविकार- पाण्डुरोग इत्यादयो नानानामानो रोगाःसमुत्पद्यन्ते ।

## शनिः

वायुतत्त्वयुक्तःशुष्कश्च ग्रहोऽयं वर्तते । शरीरे अस्थिसन्धि-पाद-जानु-वात-संस्थान- स्नायुसंस्थान-मज्जा तथैव वात इत्यादिषु क्षेत्रेषु प्रभावो ग्रहस्यास्य दृश्यते । ग्रहेऽस्मिन् बलवति सति स्नायुमण्डलं पुष्टं तथैव शरीरं सुदृढं भवति । निर्बले अशुभकारके रोगकारके च सति वायुविकार- स्नायुविकार- सन्धिपीडा- वातरोग- पक्षाघात- मूढता- अङ्गविकल-असन्तोष- नैराश्य- मानसिकरोग इत्यादयो विविधो विकारा जायन्ते । अपराधकारभ्य आत्महननपर्यन्तम् अनिष्टं ग्रहोऽयं कर्तुं समर्थो भवति ।

## राहुः

ग्रहोऽयं वायुतत्त्वयुक्तो वर्तते । शरीरे मस्तिष्क- रक्त- त्वक् तथैव वात इत्यादिषु ग्रहस्यास्य प्रभावो वर्तते । बलवति सति ग्रहे शरीरे उत्साहश्चैतन्यञ्च जागर्ति । तथैव निर्बले रोगकारके अशुभकारके सति तु चेचक- कृभि- मृगी-सर्पदंश-क्रण-कुष्ठरोग-अर्बुदरोग इति विविधनामानः असाध्यरोगा जायन्ते ।

## केतुः

वायुतत्त्वयक्तः केतुग्रहो वर्तते । शरीरे वात- रक्त- धर्म इति क्षेत्रेषु प्रभावो ग्रहस्य दृश्यते । यदा ग्रहोऽयं बलबान् भवति तदा श्रमशक्तिः, युद्धशक्तिः, प्रतिरोधशक्तिः, क्रियाशीलता च शरीरे समुद्भवन्ति । परन्तु यदा दुर्बलो ग्रहोऽयं भवति तदा मन्दता, निष्क्रियता, शरीरे व्रणादिकम्, त्वग्रोगः चर्मविकारश्चेत्यादयो विकारा जायन्ते ।

## रोगचिन्तनसन्दर्भे भावानां परिचयः-

कुण्डल्यां लग्नाद् आरम्भ्य द्वादश भावाः(गृहाणि) सन्ति, तेषां नामानि-

१.तनुः २. धनम् ३. सहजम् ४. सुखम् ५. पुत्र ६. रोगः ७. जाया ८. मृत्युः ९. भाग्यम् १०. कर्म ११. लाभः १२. व्ययश्च कुण्डल्यां प्रथम गृहं शिरसः, द्वितीयं मुखस्य, तृतीयं बाह्वोः, चतुर्थं हृदयस्य, पञ्चममुदरस्य, सप्तमं कट्याः, अष्टमं जननेन्द्रियस्य, नवमं रुक्मस्य, दशमं जानुनोः, एकादशगृहम् ऊर्वो, द्वादशगृहं पादयोश्च प्रतिनिधयो सन्ति ।

उपर्युक्तानि कुण्डल्यां स्थितानि द्वादशगृहाणि मानवशरीरस्य निम्नलिखितभागानां प्रतिनिधित्वमावहन्ति । द्वादशभावाः शरीराङ्गानि च ।

**प्रथमं गृहम्-** मस्तिष्कम, ललाटम्, शिरश्च । **द्वितीयं गृहम्-** नेत्रम्, कर्णः, नासिका, गण्डम्, अधरम्, दन्ताः, मुखम्, जिह्वा, कण्ठञ्च । **तृतीयं गृहम्-** कण्ठः, स्कन्धः, बाहुः, कोणः, तालु, वक्षः, स्तनौ चेति । **चतुर्थं गृहम्-** फुफ्फुसः, श्वासस्थानम्, हृदयञ्चेति । **पञ्चमं गृहम्-** उदरम्, यकृत्, प्लीहा, वृक्कम्, नाभिः च । **षष्ठं गृहम्-** कटिः, नितम्बः। **सप्तमं गृहम्-** वस्तिः, मूत्राशयः, गर्भाशिस्यस्योर्ध्वभागश्च । **अष्टमं गृहम्-** गर्भाशयः, जननेन्द्रियम्, गुदम्, वृषणश्चेति । **नवमं गृहम्-** ऊरु । **दशमं गृहम्-** जानुगुल्फाः । **एकादश गृहम्-** उरु, वत्सश्च । **द्वादशगृहम्-** गुल्फः, पादः, पादाङ्गुली चेति । कुण्डल्यां लग्नादिद्वादशगृहद्वारा मनुष्यजीवने भाविन्या घटनायाः पूर्वानुमानं भवति । के के रोगाः समुद्भवन्ति । प्रत्येकं रोगाणां हेतुर्कः, केषां भावानां कारणाद् रोगा जायन्ते इति सर्वेषां ज्ञानं द्वादशभावैर्भवन्ति । (ज्योतिषशास्त्रे रोगविचारः, पृ. २३)

**प्रथमं गृहम्-** अस्मिन् गृहे शिरोवेदना- मानसिकरोग- दुर्बलतायाश्च विचारो विधीयते । गृहमिदं जनस्य स्वास्थ्यस्य प्रतिनिधिर्वर्तते । भावस्यास्य माध्यमेन जनस्य शारीरिकमानसिक क्षमतायाश्च मूल्याङ्कनं भवति । **द्वितीयं गृहम् -** भावेनानेन मृत्युविषये विचार्यते । गृहमिदं नेत्रकर्णमुखनासिकादन्तसम्बद्धरोगाणां मधुमेहस्य च प्रतिनिधिर्वर्तते । **तृतीयं गृहम्-** गृहादस्माद् विकारस्तथा च कण्ठसमस्या- गोइटर- निःश्वास, कास- दम-फुफ्फुस- हस्तविकार इति नामानो रोगा विचार्यन्ते । **चतुर्थं गृहम्-** अस्माद् गृहाद् वक्षःस्थलहृदयपृष्ठपार्श्व सम्बद्धरोगा विचार्यन्ते । उन्मादादीनां विचारोऽपि गृहेऽस्मिन् विधीयते । **पञ्चमं गृहम्-** हृदयदाहः, बुभुक्षापूरणम्, पित्तरोगः, यकृत्, प्लीहा, वृक्करोगश्चेत्यादयो रोगा अस्माद् गृहाद् विचार्यन्ते । उदरविषयक- सर्वरोगाणां प्रतिविधिर्गृहमिदं वर्तते । **षष्ठं गृहम्-** पृष्ठभागवेदना, परिशिष्टवेदना, आन्तरिकरोगः शोणिताल्पत्वम् अनिद्रा चेति गृहादस्माद् विचार्यन्ते । **सप्तमं गृहम्-** अस्माद् गृहाद् गोनोरिया- मधुमेह- ल्यूकोरिया- उपदंश- पाषाण- गर्भाशयरोग- वस्ति इत्यादीनि विचार्यन्ते । **अष्टमं गृहम्-** अस्मिन् गृहे मूत्रेन्द्रियरोगः, वीर्यविकारः, वबासीर इति रोगः, फिस्टुला-उपदंश- सङ्क्रामकरोग- वृषणरोग- मूत्रञ्चेत्यादिनामानि रोगा विचार्यन्ते । **नवमं गृहम्-** स्त्रीणां मासिकधर्मसम्बद्धरोगाः, यकृत्दोषः, रक्तविकारः, वायुः, भावविकारः, नितम्बवेदना, मज्जारोगश्चेत्यादयो विचार्यन्ते । **दशमं गृहम्-** गठिया इत्याख्यरोगः, कम्प- त्वग्रो- गः, जानुवेदना चेत्यादयो वायुरोगा गृहेऽस्मिन् विचार्यन्ते । **एकादशं गृहम्-** पादक्षतिः, अस्थिभङ्गः, वत्सवेदना, गायनविकारः, रक्तविकारश्चेत्यादयो विकारा अस्मिन गृहे विचार्यन्ते । **द्वादशं गृहम्-** असहिष्णुता, एलर्जी इति चर्मरोगः, दुर्बलता, नेत्रविकारः, पोलियो इति रोगः, शरीररोगप्रतिरोधाभावश्चेत्यादीनि गृहस्यास्य कारणेन भवन्ति । एतेषां द्वादशगृहाणां माध्यमेन मानवजीवनसम्बद्धाः प्रायः सर्वेऽपि विषया ज्ञातुं शक्यन्ते । ज्योतिषशास्त्रस्य प्रायः सर्वेषु पुस्तकेषु भावानामर्थः विस्तृतरूपेण विचारितो चर्चितश्च वर्तते । अत्र तु वयं केवलं तदेव विचारयामो यद् रोग- ज्ञानाय निवारणाय च उपयोगि भवति । रोगोपचारार्थं भावानां महत्त्वं विशेषं वर्तते । यतोहि एतेषु भावेषु प्रथम- षष्ठ- अष्टम- द्वादशभावाः रोगसम्बद्धाः सन्ति । तथैव द्वितीयं सप्तमञ्च गृहमारोग्यसम्बद्धं वर्तते । एवम्प्रकारेण उक्तानि गृहाणि रोगविषये महत्त्वपूर्णां भूमिकामावहन्ति ।प्रथमं गृहं लग्नो वा जनस्य सम्पूर्ण शरीरस्य आरोग्यविषये प्रतिनिधित्वमावहति । भावस्यास्य माध्यमेन शारीरिक सुखदुःखम्, शरीररचना, ऊर्ध्वता, वर्णः, प्रकृतिः, आरोग्यञ्चेत्यादीनि विचार्यन्ते । षष्ठगृहस्य नाम ‘शत्रुगृहम्’ वर्तते । रोगा मानवस्य प्रबलतमाः शत्रवो भवन्ति । अतः रोगाणां विचारः अस्माद् भावाद् विधीयते ।

अष्टमं गृहं ‘वयः’‘मृत्यु’ इति विषयद्वयं प्रतिपादयति (ज्योतिषरत्नाकरः, अ.२२) वयः मृत्युश्च परस्परं सम्बद्धौ

वर्तते । केनचिद् रोगेण आघातेन विकारेण वाऽन्येन कारणेन मानवस्य मृत्युर्भवति । एवं घातकरोगाः, आयुः, कालश्चेत्यादयः अस्माद् भावाद् विचार्यन्ते । रोगाणां चिकित्सायोग्यत्वे असाध्यत्वे वा वयः महत्त्वपूर्णं कारकं वर्तते । यावज्जीवति तावत् कोऽपि रोगोऽसाध्यो न भवति । परन्तु जीवनस्य अन्ते उपान्ते वा यः सामान्यरोगो भवति सोऽपि असाध्यो भवति । अतो रोगाणां चिकित्सायोग्यत्वस्य असाध्यत्वस्य वा विचारोऽपि भावादस्माद् विधीयते ।

द्वादशगृहं व्ययगृहमित्युच्यते । व्ययः अर्थाद् हानिः इति कथ्यन्ते । प्रत्येकं रोगाद् शारीरिकबलस्य जीवनशक्तेर्वा हानिर्वर्तते । अतो रोगा अपि अस्माद् गृहाद् विचार्यन्ते ।

कुण्डल्याम् अष्टमतृतीयभावौ च आयुषो भावौ मतौ वर्तेते । अर्थाद् अष्टमतृतीयभावाभ्यामायुषो विचारो विधीयते । यथा कुण्डल्यां द्वादशं गृहं व्ययगृहमित्युच्यते तथैव अष्टमतृतीयभावाभ्यां द्वादशभाव अर्थात् सप्तमद्वितीयभावौ आयुषो व्ययस्य सूचकौ वर्तेते । आयुषो व्ययो मृत्युसूचकौ वर्तेते । अनेन कारणेनैव एभिर्भावै जीवनेर्मृत्योः प्राप्यमाणानां मृत्युतुल्यपीडानां विचारो विधीयते । भावौ इमौ मारकभावौ इत्युच्येते ।

एवं स्पष्टं वर्तते यत् कुण्डल्या द्वादशभावेषु प्रथम-षष्ठ-अष्टम-द्वादश-द्वितीय-सप्तमभावानां रोगविचारेण सह सम्बन्धो वर्तते । अतो रोगविचारकाले भावानामेषां सावधानतया विचारः कर्तव्यः ।

कुण्डल्यां षष्ठं गृहं रोगस्थानं कथ्यते । जनः केन रोगेण पीडितो भविष्यति, केन शरीराङ्गानि विकलानि भविष्यन्ति इति सर्वमपि षष्ठगृहान्निर्णायिते । एतद् गृहं शत्रुगृहं वर्तते यतोहि रोगोऽपि शरीरस्य महान् शत्रुर्वर्तते । यथा अष्टमगृहान्मृत्युर्विचार्यते तथैव षष्ठादपि रोगो विचार्यते ।

यदि षष्ठे गृहे ग्रहो वर्तते तर्हि राशिरोगेण विचार्यते अन्यथा राशिरोगेण मन्यते । यदि शुभग्रहाः षष्ठगृहे स्थितं राशिं न पश्यन्ति तर्हि जीवने व्याधेः सम्भावना भवति परन्तु रोगः शीघ्रमेव निवार्यते । यदि च षष्ठे गृहे सूर्य चन्द्रयोरशुभादृष्टिर्वर्तते चेत् तर्हि गभीररोग उत्पद्यते । (मानसागरी, अ.४, रिपुभावः, चारश्लो.१) । सूर्यचन्द्रौ प्राणदातारौ मन्यते । अतस्सूर्यचन्द्रयोः शुभस्थितयोः रोगो दुर्लभः । राशिरोगेषु मङ्गलस्य कारणेन तापो दाहो वा समुत्पद्यते । अतो ज्वरः तापः विस्फोटकरोगाः तीव्ररोगाश्च भवन्ति ।

बुधग्रहस्य बुद्धाज्जादिषु तन्त्रिकासु विशेषः प्रभावो वर्तते । अतो वेदना-निद्रा-आलस्य-विस्मरण-चक्कर इति कर्णश्चेत्याद्यः समस्या भवन्ति । अधिकपरिश्रमाद् अभ्यासाच्च् ये रोगाः समुत्पद्यन्ते तेऽपि बुधस्य प्रभावेणैव भवन्ति । यथा- पाचनतन्त्रविकारः, बुभुक्षाहानिः, मेदवृद्धिः, तृष्णावृद्धिश्चेत्यादीनि । बृहस्पतिः शुभग्रहो वर्तते । अतः सामान्यतया स रोगान् न जनयति तथापि दुष्टग्रहैः सह बृहस्पतिग्रहस्य सम्बन्धो भवति चेद् वीर्यसम्बद्धरोगान् जनयति । शुक्रो वृश्चिके षष्ठे स्थित्वा तापं ददाति तथा च मिथुन-तुला-कुम्भराशिषु स्थित्वा कामवृद्धिं स्त्रिया सह सम्भोगावसरञ्च सृजति । शुक्रस्य प्रायो जलरोगः, 'था यरायङ् ' इति मूत्रमार्गसम्बद्धरोगश्चेत्यादयो रोगा भवन्ति ।

*पित्तः पङ्गुः कफः पङ्गु पङ्गवो मूलधातवः ।*
*वायुना यत्र नीयन्ते तत्र गच्छन्ति धातवः ॥*

माधवनिदानकारः कथयन् स्पष्टीकरोति यद् वायुरनुकूलो भवति तदा केवलं मनुष्योन अपितु जगदपि स्वस्थं भवति । शनेर्मुख्यो धर्मः शैत्यम्, वायुशुष्कता, दीर्घरोगश्च वर्तते, यदा शनिः षष्ठभावे लग्नेशात् षष्ठेशेन सह सम्बन्धं ग्रथति तदा शरीरं सुखदायकं न भवति । शनिसूर्ययोः परस्परं दृष्टौ सत्यां शरीरं सर्वदा अस्वस्थमेव भवति । शैत्यम्, उदासीनता, स्वेदः, उन्मादः, वातरोगः, सन्धिवातः, आमवातः, बधिरता, पक्षाघातः, कृष्णज्वरः, त्वग्रोगः, क्षयरोगः, श्वासकासादिसम्बद्धरोगा भवन्ति । षष्ठे गृहे राहुकेतू ग्रहौ अशुभौ न भवतः। यस्यां कुण्डल्यां षष्ठस्थकेतुग्रहस्य प्रभावः कुत्सितो भवति परन्तु यदा सूर्यकेतू ग्रहौ षष्ठभावे भवतः तदा सूर्यः पीडादायको भवति । राहुस्तु केवलं मेष-कर्क-

वृश्चिक-सिंह-मीन राशिषु षष्ठस्थाने च कदाचिद् ईषदेव अशुभफलं प्रददाति प्रायः शुभफलमेव ददाति, तस्य शुभप्रभाव एव भवति।

ग्रहयोगदृष्ट्या अपि विविधरोगाः सन्दृश्यन्ते । यथा शिरोवेदना, नेत्ररोगः, अन्धता, इत्यादिरोगाः । ग्रहसंयोगादपि बहवो रोगा दृश्यन्ते यथा काणयोगः, कर्णरोगः, दन्तरोगः, नासिकारोगः, वाणीरोगः, कण्ठरोगः, वक्षस्थलरोगः, उदररोगः, लिङ्गरोगः, नपुंसकतायोगः, व्रणयोगः, पित्तविकारः, पिशाचविकारः, ओष्ठरोगः, शरीरस्य दौर्बल्यं भयरोगः, अङ्गवैकल्ययोगः, गृह-जल-चौर-अग्नि-पशु-सर्पादिभ्यो भययोगः, चिन्तायोगश्च । द्वादशस्थानाद् विनाशस्य विचारो विधीयते । षष्ठं गृहमुदरस्य यकृतोऽपि च वर्तते । सर्वरोगाणां कारणं धातुमलं वर्तते । अत एव चिकित्साशास्त्रस्य मुख्योद्देश्यं प्रथमं पाचनक्रियायाः सुव्यवस्थापनं वर्तते।

अतः षष्ठभावः षष्ठेशो बुधः, कन्याराशिश्चेत्येतेषां दोषैः उदरविकार-रोगभय-राजभय-शत्रुभयञ्चेत्यादीनां सम्भावना भवतीति सुस्पष्टं भवति।

यदि जन्मिनां बुधयुतो लग्नेशो वर्तते चेत् तदा मुखरोगो भवति। (भावकुतूहलं शत्रुभावः, विचारः२७)।

एतद् केवलमनुचितभोजनस्य जीवनशैल्याश्च कारणेन, लग्नेश्वरस्य षष्ठेशस्य च संयोगात् सम्भवति । अनेकरोगाः समुत्पद्यन्ते । यथा लग्नेशः षष्ठेशः सूर्यश्च सहैव वर्तते चेज्ज्वरः, पित्तः, शोणितक्षयः, यक्ष्मा, जीवनशक्तिहीनता चेत्यादीनि अनिष्टानि भवन्ति।

यदि लग्नेशः षष्ठेशो मङ्गलेन सह अवस्थितो वर्तते चेद् रक्तविकारः, क्षतम्, विस्फोटकाश्च भवन्ति। तथैव बुधेन सह वर्तते चेत् वित्तपाषाणः, अरूचिः, वमनादिकं च भवन्ति । बृहस्पतिना सह वर्तते चेद् रोगराहित्यम्, सामान्यमस्वास्थ्यम् एवं शुक्रेण सह वर्तते चेत् स्त्रीरोगः, वीर्यरोगः, मूत्ररोगस्तथा शनिग्रहेण सह वर्तते चेद् वातरोगः, उदररोगः, राहुकेतूभ्यां वर्तते चेत् शिरोवेदना, चोरभयम्, अग्निभयम्, कारागारम् इत्यादीनि भवन्ति। लग्नस्थषष्ठेशेन सह मङ्गलेन युतं चेद् आकस्मिकी घटना, शल्यक्रिया, हत्या इत्यादीनां भयं जनयति।

एवमष्टमभावे यदि कोऽपि शुभग्रहो वर्तते चेत् तदा सुखपूर्वकं मृत्युर्भवति परन्तु यदि पापग्रहत्र वर्तते चेत् सकष्टं मृत्युर्भवति । यो ग्रहोऽष्टमस्थो वर्तते तस्यैव धातु-प्रकोपेण मृत्युर्भवति । अष्टमस्थसूर्ये अग्निपित्तज्वरादीनि कारणानि भवन्ति तथा अष्टमस्थचन्द्रसन्निधौ जलाद् अतिसारेण भवति। मङ्गलसन्निधौ शस्त्रादिभ्यो विषूचिका रोगाद्, बुधे सति ज्वराद्, अतिशैल्याद्, गुरौसति रोगानिवारणं दुष्करं भवति, शुक्रौ सति पिपासया अथवा वीर्यरोगेण, शनौ सति क्षुधया एवमत्यधिकभोजनेन, राहौ सति दुर्घटनया तथा च केतौ सति शस्त्राघातेन मृत्युर्भवति।

यथा प्रत्येकं कर्मणःफलं द्विविधं भवति । तथैव रोगोवशमनोपाया अपि दृश्यादृश्यप्रकारका भवन्ति । दृश्योपाय उपचारो वर्तते चेद् अदृश्योपायः प्रायश्चित्तं वर्तते । ग्रहचिकित्सा त्रिविधाः सन्ति । १. देवव्यापाश्रयः २. युक्तिव्यापाश्रयः ३.सत्याश्रयश्च। ज्योतिषशास्त्रमते सर्वे रोगाः पूर्वजन्मविहिताशुभकर्मणां परिणामाःसन्ति।

## निष्कर्षः

जन्मजातरोगा जातकस्य पूर्वजन्मकर्मणा मातापित्रोः कारणेन च भवन्ति। ज्योतिषशास्त्रे जन्मजातरोगस्य विचारो गर्भाधानेन कुण्डल्या च सुस्पष्टतया क्रियते। अर्थाद् गर्भाधानेन सह जन्मजातरोगस्य सम्बन्धो वर्तत इति। कुण्डलीषु अष्टमस्थानाद्, अष्टमेशग्रहाद्, अष्टमस्थाने विद्यमानाद् ग्रहाद्, अष्टमस्थानं दर्शिनो ग्रहाद् एवमन्ययोगेभ्यो जन्मजातशारीरिक रोगाणां विचारो विधीयते । अष्टमेशचतुर्थेशयोः संयोगदृष्ट्या अर्थात् योगानामाधारेण जन्मजातमानसिकरोगा विचारणीयाः भवन्ति। तथैव मानसिकरोगसम्बद्धयोगेषु अष्टमेशचतुर्थेशयोर्यदि योगःसम्बन्धो वा

न दृष्यते चेद् मानसिकरोगा जन्मजाताः सन्तोऽपि चिकित्सया साध्या भवन्ति। ये रोगाः प्रत्यक्षरूपेण जिज्ञास्यन्ते ते रोगा दृष्टनिमित्तजन्यरोगाः इत्युच्यन्ते। भय-शाप-अभिचार-घात-संसर्ग-महामारी-दुर्घटना चेत्यादिप्रत्यक्षकारणेभ्यः समुत्पन्ना रोगाः दृष्टनिमित्तजन्यरोगा वर्तन्ते। अत एतेषां रोगाणां प्रत्यक्षत्वं सम्भवति। कुण्डल्यां षष्ठं स्थानं रोगाणामेवं शत्रूणाञ्च प्रतिनिधित्वमावहति। यदा कश्चिज्जनो येन केनापि कारणेन कस्यचिद् विरुद्धो भवति ततश्च विरोधो वर्धते चेत् तथा शापाभिचारघाताश्च आश्रीयन्ते। प्रत्यक्षरूपेण येषां रोगाणां हेतुर्न दृश्यते ते रोगा अदृष्टनिमित्तजन्यरोगाः इत्युच्यन्ते। ज्वर-अतिसार इत्याख्याः सर्वेऽपि रोगा अस्मिन् वर्णे आयान्ति। एवंविधरोगान् विचारयन्तो ज्योतिर्विद आचार्या बाधकग्रहाणां प्रभाव एवादृष्टनिमित्तजन्यरोगाणां प्रमुखोहेतुर्वर्तत इति कथितवन्तो वर्तन्ते। ज्योतिषशास्त्रे रोगविचारार्थं त्रीणि प्रमुखानि तत्त्वानि सन्ति। ग्रहः, राशिः, गृहञ्च। अतो ज्योतिषशास्त्रदृष्ट्या रोगाणां विस्तृतरूपेण चर्चां विधातुं पूर्वं ग्रहराशिगृहादीनां विचार आवश्यकः। नवग्रहा भिन्नाः सन्तोऽपि एकस्मिन् भावे केचन ग्रहाः सहैव स्थातुं शक्नुवन्ति। भिन्नाःसन्तोऽपि चेत् ते ग्रहा जनान् प्रभावयिष्यन्ति। ग्रहाणामेतादृशः प्रभावो भवति येन प्रभावेण ते रोगं जनयन्ति तथैव शरीरं पीडयन्ति च।

## कार्तज्ञज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च परामर्शं प्रदाय महदुपकारं कृतवद्भ्यो विज्ञगुरुजनेभ्यः, अन्येभ्यः सहयोगिभ्यश्च सश्रद्धं सधन्यवादञ्च हार्दं कार्तज्ञं प्रकटयामि।

## सन्दर्भग्रन्थाः

१. ज्योतिष रत्नाकरः (पुनर्मुद्रण, सन् १९८८, देवकीनन्दनसिंहः), दिल्ली, मोतीलाल बनारसीदासः।

२. फलदीपिका ( पुनर्मुद्रण, सन् १९८८, पं गोपेश्वरः ओझा) दिल्ली, मोतीलान बनारसीदासः।

३चिकित्सा ज्योतिष ., (सन् १९९६, अभय कात्यायनः), आगरा, भगवती पॉकेट बुक्स।

४. भावकुतूहलम्, (सन्१९९७., जीवनाथः) वाराणसी, ज्योतिष प्रकाशनम्।

५. जातकालङ्कारः (सन् १९९७, टीकाकारः सीतारामः शास्त्री), जातकालङ्कार खेमराज श्रीकृणदास प्रकाशनम्।

६. सारावली (पुनर्मुद्रण, सन् १९९८, कल्याणवर्मा), दिल्ली, मोतीलाल बनारसीदासः।

७. जातकतत्त्वः, (सन् १९९९, गोपेश्वरकुमारः ओझा), वाराणसी, ज्योतिषविद्या भवनप्रकाशनम्।

८. बृहज्जातकम् (पुनर्मुद्रण, सन् १९९९, दैवज्ञवराहमिहिरः), दिल्ली, मोतीलाल बनारसीदासः।

९. ज्योतिषशास्त्र में चिकित्साशास्त्र, (सन् २००६, रामेश्वरमिश्रः,) नई दिल्ली, सागर पब्लिकेशन।

१० .जातकपारिजातः, (अष्टम संस्क. वि.सं.२०५३, वैद्यनाथः), वाराणसी, चौखम्बा संस्कृत संस्थानम्।

११. गरुडपुराणम्, ( वि२० .सं.५८, वेदव्यासः), बाराणसी, बंबई पुस्तकभवनम्।

१२. ज्योतिष रोग विज्ञान एवं समाधान, (वि.सं. २०६७, मुरलीधरमिश्रः), वाराणसी, चौखम्बा सस्कृतभवनम्।